(यथा, रघौ। १। ४।
"मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गति:।")
मुक्तादिकम्। तत्पर्य्याय:। रत्नम् २ मणी ३।
इत्यमर:। २। ६। ६३। (तथाचास्य पर्य्याय:।
"रत्नं क्लीवे मणि: पुंसि स्त्रियामपि निगद्यते।
स तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
अस्य गुणा:।
"मणिरत्नं परं शीतं कषायं स्वादु लेखनम्।
चक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम्॥"
इति राजवल्लभ:॥
(तथाचास्य गुणा:।
"मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादय:।
चक्षुष्या मणय: शीता लेखना विषसूदना:।
पवित्रा धारणीयाश्च पाप्मालक्ष्मीमलापहा:॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये।)
अजाया: कण्ठस्थितस्तन:। लिङ्गाग्रम्। अलि-
ञ्जर:। इति मेदिनी। २४॥ योन्यग्रभाग:। इति
शब्दरत्नावली॥ नागविशेष:। इति जटाधर:॥
मणिबन्ध:। इति हेमचन्द्र:॥ (मुनिभेद:। यथा,
महाभारते। २। ११। २२।
"असितो देवलश्चैव जैगिषव्यश्च तत्त्ववित्।
ऋषभो जितशत्रुश्च महावीर्य्यस्तथा मणि:॥")
मणिकं, क्ली, (मणिरिवेति मणि+"यावादिभ्य:
कन्।" ५। ४। २९। इति स्वार्थे कन्।
अलिञ्जर:। इत्यमर:। २। ९। ३१॥ (यथा,
मात्स्ये। १। २१।
"स तमादाय मणिके प्राक्षिपज्जलचारि-
णम्॥")
मणिकर्ण:, पुं, कामरूपस्थशिवलिङ्गभेद:। यथा,
"भस्मकूटस्य चैशान्यां मणिकूटो महागिरि:।
मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गक:॥
स सद्योजातरूपस्तु मणिकर्ण इतीरित:।
सद्योजातस्य मन्त्रेण पूजितव्य: सदा शिव:॥"
इति कालिकापुराणे ८१ अध्याय:॥
मणिकर्णिका, स्त्री, (कर्णे भवा इति। कर्ण+"कर्ण-
ललाटात् कनलङ्कारे।" ४।३।६५। इति कन्।
टाप्। अकारस्य इत्वम्। मणिमयी कर्णिका
शाकपार्थिवादिवत् समास:। सा विद्यते यत्रेति
वा। विष्णोस्तपस्याप्रचयदर्शनात् विस्मिततया
शिवस्य मणिमयकुण्डलपतनादस्यास्तथात्वम्।)
काशीस्थतीर्थविशेष:। तदुत्पत्तिर्यथा। विष्णुं
प्रति शिववाक्यम्।
"त्वदीयस्यास्य तपसो महोपचयदर्शनात्।
यन्मयान्दोलितो मौलिरहिश्रवणभूषण:॥
तदान्दोलनत: कर्णात् पपात मणिकर्णिका।
मणिभि: खचिता रम्या ततोऽस्तु मणि-
कर्णिका॥
चक्रपुष्करिणीतीर्थं पुरा ख्यातमिदं शुभम्।
त्वया चक्रेण खननाच्छङ्खचक्रगदाधर॥
मम कर्णात् पपतेयं यदा च मणिकर्णिका।
तदा प्रभृति लोकेऽत्र ख्यातास्तु मणिकर्णिका॥

श्रीविष्णुरुवाच।
मुक्ताकुण्डलपातेन तवाद्रितनयाप्रियम्।
तीर्थानां परमं तीर्थं मुक्तिक्षेत्रमिहास्तु वै॥
काशतेऽत्र यतो ज्योतिस्तदनाख्येयमीश्वर!।
अतो नामापरञ्चास्तु काशीति प्रथितं विभो!॥
अन्यं वरं वरे देव। देय: सोऽप्यविचारितम्।
स ते परोपकारार्थं जगद्रक्षामणे शिव!॥
आब्रह्मस्तम्बपर्य्यन्तं यत्किञ्चिज्जन्तुसंज्ञितम्।
चतुर्षु भूतग्रामेषु काश्यां तन्मुक्तिमाप्स्यति॥
तस्मिंस्तीर्थवरे शम्भो! मणिश्रवणभूषण!
सन्ध्यां स्नानं जपं होमं वेदाध्ययनमुत्तमम॥
तर्पणं पिण्डदानञ्च देवतानाञ्च पूजनम्।
गोभूतिलहिरण्याश्वदीपान्नाम्बरभूषणम्॥
कन्यादानं प्रयत्नेन सप्ततन्तूननेकश:।
व्रतोत्सर्गं वृषोत्सर्गं लिङ्गादिस्थापनं तथा॥
करोति यो महाप्राज्ञो ज्ञात्वायु: क्षणभङ्गुरम्।
विपत्तिं विपुलाञ्चापि सम्पत्तिमतिभङ्गुराम्॥
अक्षया मुक्तिरेकास्तु विपाकस्तस्य कर्म्मण:।
अन्यच्चापि शुभं कर्म्म यद्दत्तं श्रद्धया हुतम्॥
विनात्मघातमीशान त्यक्त्वा प्रायोपवेशनम्।
नै:श्रेयस्या: श्रियो हेतुस्तदस्तु जगदीश्वर!॥
नानुशोचति नाख्याति कृत्वा कालान्तरेऽपि
यत्।
तदिहाक्षयतामेतु तवेश! त्वदनुग्रहात्॥
तव प्रसादात्तस्येह सर्व्वमक्षयमस्तु तत्।
यदस्ति यच्च विष्णुश्च यद्भूतञ्च सदाशिव!॥
तस्मादेतच्च सर्व्वस्मात् क्षेत्रमस्तु शुभोदयम्।"
इति काशीखण्डे मणिकर्णिकाख्यानं नाम २६
अध्याय:॥
मणिकर्णीश्वर:, पुं, (मणिकर्ण्या मणिकर्ण्यां वा
ईश्वर:।) काशीस्थशिवलिङ्गविशेष:। यथा,—
"ओङ्कारं प्रथमं पश्येत् मत्स्योदर्य्यां कृतो-
दक:।
त्रिपिष्टपमहादेवं ततो वै कृत्तिवाससम्॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत्।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं तत:॥
विश्वकर्म्मेश्वरञ्चाथ मणिकर्णीश्वरं तत:।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत्॥
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभि:।"
इति काशीखण्डे १०० अध्याय:॥
मणिकर्णेश्वर:, पुं, (मणिकर्णस्तदाख्य ईश्वर:।)
कामरूपस्थशिवलिङ्गविशेष:। यथा,—
"सर्व्वतीर्थजले स्नात्वा स्पृष्ट्वा चन्द्रं सवासवम्।
मणिकर्णेश्वरं दृष्ट्वा मुक्तिभंजापत्रं गते॥"
इति कालिकापुराणे ८१ अध्याय:॥
मणिकाननं, क्ली, (मणीनां काननमिव। बहु-
मणिधारणादस्य तथात्वम्।) कण्ठ:। इति
शब्दरत्नावली॥ रत्नवनञ्च॥
मणिकार:, पुं, (मणिं करोतीति। कृ+अण्।)
मणिनिर्म्मितालङ्कारादिकर्त्ता। जौहरि इति
भाषा। तत्पर्य्याय:। वैकटिक: २। इति
हेमचन्द्र:॥ न्यायचिन्तामणिकर्त्ता च॥

मणिकूट:, पुं, (मणय: मणिमयानि कूटानि
शिखराणि यस्य स:।) कामरूपस्थपर्व्वतभेद:।
यथा,—
"भस्मकूटस्य चैशान्यां मणिकूटो महागिरि:।
मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गक:॥"
इति कालिकापुराणे ८१ अध्याय:॥
"मणिकूटस्याथ गिरेर्गन्धमादनकस्य च।
मध्ये स्रवति लौहित्यो ब्रह्मपुत्त्र: समाश्रित:॥
हत्वा ज्वरं तथा विष्णुस्तत्र वासमथाकरोत्।
नरदेवासुरादीनां यथा भवति वै हितम्॥
ज्वरेणापीडिततनुर्ज्वरं हत्वा महासुरम्।
सर्व्वलोकहितार्थाय सोऽगदस्नानमाचरत्॥
अगदस्नानसंभूतं संजातञ्च महासर:।
तस्य स्वयं नाम चक्रे हयग्रीवोऽपुनर्भवम्॥
न पुनर्जायते यस्मात् तत: स्नात्वा नरोत्तम:।
अपुनर्भवसंज्ञं तत् सरस्तु परिकीर्त्तितम्॥
मणिकूटाचले विष्णुर्हयग्रीवस्वरूपधृक्।
स च व्यामप्रमाणेन विस्तारेणैव संस्थित:॥"
इति कालिकापुराणे ८० अध्याय:॥
मणिखनि:, पुं, (मणीनां खनि:।) मणेराकर:।
यथा। मणे: खनि:॥ इति मुग्धबोधव्याकरणम्॥
मणिग्रीव:, पुं, (मणयो ग्रीवायां कन्धरायां यस्य।)
कुवेरपुत्त्र:। इति शब्दरत्नावली॥ रत्नकन्धरे
त्रि॥ (यथा, ऋग्वेदे। १। १२२। १४।
"हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो
विश्वे वरिवस्यन्तु देवा:॥"
"मणिग्रीवं रत्नाद्युपेतकण्ठम्।" इति तद्भाष्ये
सायन:॥)
मणिच्छिद्रा, स्त्री, (मणेरिव छिद्रमस्याम्।) मेदा-
नामौषधम्। ऋषभाख्यौषधम्। इति मेदिनी।
रे, २६०॥ (तथास्या: सलक्षणपर्य्याय:।
"महामेदाभिधो ज्ञेयो मेदालक्षणमुच्यते।
शुक्लकन्दो नखच्छेद्यो मेदोधातुमिव स्रवेत्॥
य: स मेदेति विज्ञेयो जिज्ञासातत्परैर्जनै:।
शल्यपर्णी मणिच्छिद्रा मेदा मेदोभवाध्वरा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मणितं, क्ली, (मण्+भावे क्त:। मैथुनकालीन-
वाक्यम्। "स्तनितमणितादि सुरते।" इति
साहित्यदर्पणे।) तत्पर्य्याय:। रतकूजितम् १।
इति हेमचन्द्र:॥ (यथा, शिशुपालवधे।१०।७५।
"सीत्कृतानि मणितं करुणोक्ति:
स्निग्धमुक्तमलमर्थवचांसि॥")
मणितारक:, पुं, (मणेरिव दीप्तिमती तारका
यस्य।) सारसपक्षी। इति राजनिर्घण्ट:॥
मणिद्वीप:, पुं, क्ली, (मणिप्रचुरो द्वीप:।) क्षीर-
समुद्रमध्ये पद्मरागादिमणिमयान्तरीप:। स च
त्रिपुरसुन्दरीवासस्थानम्। यथा,—
"सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिसरे
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे।
शिवाकारे मञ्चे परमशिवपर्य्यङ्कनिलयां
भजन्ति त्वां धन्या: कति च न चिदानन्दलहरीम्॥"
इत्यानन्दलहरी॥